**WEST BENGAL STATE UNIVERSITY**
B.A. Honours 2nd Semester Examination, 2021

# SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## SECTION-A

1. यथाविहितं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) महाकविवाणभट्टेन विरचितायाः कादम्बर्य्याः शुकनासोपदेशमनुसृत्य लक्ष्म्याः चरित्रं निंरूप्यताम्।

(ख) वाणभट्टस्य रचनाशैली वर्ण्यताम्।

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) चन्दनप्रभवो न दहति किमनलः ? किंवा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ?

(ख) आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवतीति।

(ग) मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्।

(घ) तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्।

(ङ) इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका।

अथवा

अधोनिर्दिष्टं विषयत्रयमाश्रित्य टीका लेख्या। 5×3 = 15

(क) गन्धर्वनगरलेखा (ख) वडवानलः (ग) मृगतृष्णिका (घ) कुसुमशरः (ङ) कालकूटः।

## SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) चन्द्रपालितेन वर्णितस्य व्यसनस्य गुणाः संक्षेपेण आलोचनीयाः।

(ख) 'दण्डिनः पदलालित्यमि'ति विद्वद्वचनतात्पर्य्यं वैशद्येन विवृणुत।

4. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। $2\times5 = 10$

(क) 'विश्रुतचरितम्' कस्य ग्रन्थस्य अंशः ? अस्य ग्रन्थस्य रचयिता कः ?

(ख) राजविद्याः कतिविधाः ? काश्च ताः ?

(ग) कः वसुरक्षितः ? स कम् उपदिष्टवान् ?

(घ) विहारभद्रस्य परिचय उपस्थाप्यताम्।

(ङ) के तावत् षड्गुणाः ?

(च) 'क्लिष्टस्य मे क्रियतामाचार्य साहाय्यकम्' — कं प्रति कस्योक्तिरियम् ?

(छ) के तावद्राजानः रिपुषट्कं जेतुमसमर्थाः आसन् ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। $5\times1 = 5$

(क) दण्डी (ख) पञ्चतन्त्रम् (ग) वेतालपञ्चविंशतिः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——